International Journal of Sanskrit Research 2020; 6(3): 119-124

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(3): 119-124
© 2020 IJSR
www.anantaajournal.com
Received: 12-03-2020
Accepted: 15-04-2020

**S Suryanarayanmurthy**
Assistant Professor, Department of Krishna Yajurveda, Sri Venkateswara Vedic University, Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**S Suryanarayanmurthy**
Assistant Professor, Department of Krishna Yajurveda, Sri Venkateswara Vedic University, Tirupati, Andhra Pradesh, India

# तैत्तिरीयप्रातिशाख्येषु लोपालोपविचारः

**S Suryanarayanmurthy**

## भूमिका-

श्रीवेङ्कटाचलाधीशं श्रियाध्यासितवक्षसम्।
श्रितचेतनमन्दारं श्रीनिवासमहं भजे।।

वेदेषु क्रमजटादि विकृतिपाठानां विशेषफलप्रदानां अध्ययनं निर्दुष्टं कर्तुं व्यासयाज्ञवल्क्यकौण्डिन्यादीनां शिक्षाशास्त्राणां परिज्ञानमवश्यं करणीयम्। शिक्षादि शास्त्रान्तरेण वेदमन्त्रेषु लोपालोपसत्वषत्वरेफविसर्गयत्वप्रगृह्यआगमदीर्घह्रस्वादि नैके विषयाः स्व स्व शाखीय प्रातिशाख्यग्रन्थेषु निरूप्यन्ते। तेषु अन्यतमं तैत्तिरीयप्रातिशाख्यम्। उच्यते खलु शाखायां शाखायां प्रतिशाखं भवं प्रातिशाख्यम् इति। प्रातिशाख्यस्य सम्बन्धः न केवलं शाखाविशेषे परं शाखासमूह इत्यर्थेपि उपयुज्यते। एवं च प्रातिशाख्यग्रन्थस्य सम्बन्धः न केवलं वेदस्यैकस्याः शाखायाः अपि तु अनेकशाखायाः कृते उक्तम्, तैत्तिरीयप्रातिशाख्ये [1]"वीत्युपबन्धस्य व्यावर्त्य शाखान्तरे नन्वेवमनेकशाखाविषयत्वे प्रातिशाख्यमिति ग्रन्थस्य आख्या विरूध्यते" इत्यादि। अस्य प्रातिशाख्यस्य कर्ता कुमारस्वामी, उच्यते जटादर्पणे- कुमारस्वामिना प्रोक्ता धातादि विषयाश्च ये इति। एतदतिरित्य जटामणि, जटादर्पणम्, घनदर्पणम् इत्यादि प्रातिशाख्यरूपलक्षणग्रन्थाः विकृतिपाठानां रक्षणार्थं ऋषिभिः परिकल्पिताः । लक्षणज्ञानेन सह वेदाध्ययनेन सम्पूर्णफलभाग्भवतीति शिक्षाकाराणां आशयः। उच्यते कौण्डिन्यशिक्षायां "उत्तमो लक्षणज्ञानी लक्ष्यज्ञानी तु मध्यमः। लक्ष्यलक्षणयोर्ज्ञानी तद्धि पात्रं प्रशस्यते। लक्षणं न त्यजेद्धीमान् सम्प्रदायो□न्यथा भवेदिति"[2]। अत्र तैत्तिरीयप्रातिशाख्येषु प्रतिपादितसूत्रानाधारीकृत्य विकृतिपाठेषु लोपालोपविध्यनुसारं कथं पाठेषु वैलक्षण्यं जायते तस्य विविध उदाहरणेन समस्यायाः परिष्करणार्थं प्रयत्नं क्रियते।।

**लोपालोपविधिः-**

तैत्तिरीयशाखायां पदद्वयस्य यदा संहिता भवति तदानीं पूर्वपदान्ते एकार, ओकारो वा भवति चेत् उत्तरपदादौ विद्यमानः अकारः नोच्चार्यते, इदमेव अकारस्य अनुच्चारणं व्यासशिक्षायां ऐक्यमिति व्यवह्रियते। तथा च शिक्षावचनम्- "अथैतद्विषयेष्वेकमेदोदित-स्त्वसीति च"[3]। तैत्तिरीयप्रातिशाख्येषु सन्दर्भेस्मिन् अकारस्य लोप इति सूत्रितम्। तथा च- लुप्यतेत्वकार एकार ओकारपूर्वः [4] इति । कुत्रचित् एकारे ओकारे पूर्वे संहितायां सत्यामपि अकारस्य उच्चारणं भवत्येव। इदम् अकारसहितोच्चारणमेव अनैक्यमिति व्यासशिक्षायां व्यवह्रियते। उच्यते- "एतोत्पूर्वे□यकारोर्ध्वं एकं पूर्व समन्वितः" [5]इति। अलोप अपि प्रतिपाद्यते । यथा - "अथालोपः"[6]। इति

अलोपस्थानानाम् अभिज्ञानम् अनुवाकग्रहणेन, तत्तद्विशेषसंज्ञा ग्रहणेन, पूर्वनिमित्तपदग्रहणेन, कार्यभाक् पदग्रहणेन, पुनरुक्त, अन्यदुक्त, इत्युत्तरेत्यादि विशेषनियमकल्पनेन च तत्र तत्र लभ्यते। एतच्च लोपालोपपरिज्ञानं विलोमपाठे विशेषाध्ययनेनैव ज्ञातुं शक्यते। तैत्तिरीयेषु विलोमपाठे एकारपूर्व ओकारपूर्वो वा अकारः यत्र न लुप्यते तानि लक्ष्याणि ससूत्रं विवरणपुरस्सरं समीक्ष्यन्ते।

**लोपविधेः अपवादभूताः अलोपाः-**

धातारातिरित्याद्यलोपानुवाकेषु य-व-न-ह इत्यादि विधिभिः कुत्रचित् अकारस्य लोपः उक्तः। तदपवादत्वेन पुनः अकारलोपः उच्यते केषुचित् स्थलेषु । यथा-

सूत्रम्-

> "अगूँ हसोऽगूँहतिरनिष्टृतोऽवन्त्वस्मानवद्यादहनि च"।[7]

"अगूँहसो यत्र पीपरत्"[8] इत्यत्र विलोमे "अगूँहसो अगूँहसः" इति अलोपस्य साधनार्थम् "अगूँहसोऽगूँहतिरनिष्टृतोऽवन्त्वस्मानवद्यादहनि च" इत्यनेन सूत्रेण अगूँहसः पदग्रहणं कृतम्। वस्तुतः तत्र "अगूँहसः" इति पदं धातारातिरित्यादिषु अलोपानुवाकेषु विद्यत इति हेतोः अलोपः सिद्ध एव। किन्तु अत्र अयं विशेषः। तत्र "धातारातिरित्यादिषु अलोपानुवाकेषु यवनहपरस्परपरेषु" इति सूत्रेण केषाञ्चनपदानाम् अलोपविधेः अपवादः उक्तः। स च अपवादः अगूँहसः इत्यत्र अकारहकारयोः अनुस्वार व्यवधाने सत्यपि प्रवर्तते। शिक्षायामपि अनुस्वारव्यवधानं कार्यविरोधि न भवति इति वदन्ति। तथा च-

> "विधेर्मध्यस्थ नासिक्यो न विरोधो भवेत् स्मृतः।
> तस्मात्कुर्वन्ति कार्याणि वर्णानां धर्म एव हि।।" इति

तथा सति तत्र अकारस्य लोपविधिः प्रसज्येत, "तन्माभूदिति अगूँहसोऽगूँ"हति[9] इति सूत्रेण अलोपविधानं कृतं येषु पदेषु अकारात्परं स्वररहिताः यकार, वकार,नकार, हकाराः भवन्ति। अयमेव प्रकारः अगूँहति इत्यत्रापि अनुसरणीयः।

सामान्यतया पुनरुक्तस्थलेषु त्रिपदप्रभृतिन्यायेन विधयः प्रवर्तन्ते। किन्तु व्यासशिक्षायाम्-

> "पुनरुक्तं यतः पञ्चपदमित्युत्तरञ्च या।
> पूर्ववद्भवति ज्ञेयं सर्वत्रापि विचक्षणैः।।[10]

इत्युक्तत्वात् पुनरुक्तब्राह्मणवाक्येष्वपि अलोपविधयः पूर्ववद्भवन्ति। उक्तञ्च जटामणौ-

> "ऋचि ब्राह्मणवाक्येषु ह्यलं द्वित्रपदादिकम्।"[11]

तथा च विलोमोदाहरणम्-

मन्त्र- निरमन्थदग्न इत्याह। [12] उदाहरणम्-अमन्थदग्ने अग्ने अमन्थदमन्थदग्ने । अग्न इतीत्यग्नेग्न इति। मन्त्र-मानुषीभ्यस्त्वमङ्गिर इत्याह।।[13]उदाहरणम्-त्वमङ्गिरो अङ्गिरस्त्वं त्वमङ्गिरः। अङ्गिर इतीत्यङ्गिरोङ्गिरः इति।

मानुषीभ्यस्त्वमङ्गिर इत्यस्मिन् वाक्ये त्वमङ्गिर इत्यत्र विलोमे अलोप केन सूत्रेण इति विचार्यमाणे सूत्रद्वयम् उपस्थितं भवति। तत्र आदौ "धातारातिः" इत्यस्मिन् सूत्रे उख्यग्रहणेन अङ्गिर इत्यत्र अलोपो वा, अस्य वाक्यस्य उख्यान्त पातित्वात्, अथवा

“अरतिमस्य” इत्यस्मिन् सूत्रे अङ्गिर इति पदग्रहणेन अलोपः भवति वा इत्येवं पक्षद्वये प्राप्ते तत्र पूर्वं पूर्वं प्रथमम् इति सूत्रन्यायेन “धातारातिः” इति सूत्रस्य पूर्वतनत्वात् “अरतिमस्ये”ति सूत्रापेक्षया “धातारातिः” इति सूत्रमेव पूर्वं प्रवर्तते। अतः तेनैव सूत्रेण अत्र अलोपः कथनं न्याय्यम्। “अरतिमस्य” इति सूत्रे अङ्गिर इति पदग्रहणं तु “अग्ने अङ्गिर” इत्यादौ चरितार्थम्। एवञ्च “मानुषीभ्यस्त्वमङ्गिर” इत्याह इत्यत्र “मानुषीभ्यस्त्वमङ्गिर” इति पुनरुक्त वाक्यस्य अन्यपदयोगे सति-

“एदोद्भ्यां वक्ष्यतेऽतश्च यदनेकपदे पुनः।
जटोच्यतेऽन्यशब्देन तत्रानैक्यं न विद्यते।।[14]इति

**व्यासशिक्षावचनबलात् लोप एव भवति।**

“अग्ने अङ्गिरो येऽस्याम्” इत्यत्र तु “अरतिमस्य” इति सूत्रे “अङ्गिर” इतिपदग्रहणात् अलोपः भवति। पुनः षष्ठकाण्डे “अग्ने अङ्गिर” इति “त्रिरहरति” इत्यत्र “अग्ने अङ्गिर” इति पुनरुक्तवाक्यस्य अन्यपदयोगे सत्यपि पदग्रहणात् विलोमे अलोप एव भवति। तस्य उदाहरणम्-

मन्त्रः-समवर्तताग्र इति ।[15] उदाहरणम्- अवर्तताग्रे अग्रेऽवर्ततावर्तताग्रे । अग्र इतीत्यग्रेग्र इति।

एवं पुनरुक्त, अन्ययुक्त, इत्युत्तरपदसम्बन्धि अलोपविषये प्रातिशाख्य, व्यासशिक्षादि शिक्षावचनानि लभ्यन्ते । किन्तु कौण्डिन्यशिक्षायां विशेषतया उक्तम्।

“उक्तं पुनः पञ्चपदञ्चवाक्यम् इत्युत्तरं वापि तथैव सर्वतः।
ज्ञेयं बुधैः पूर्ववदन्ययुक्तं तत्रस्थलक्ष्यं न तु पूर्ववद्भवेत्।।”[16]
“ता अस्याश्मंस्ते सुवर्यं प्रमातृ प्रेद्धो यक्षत्वमग्ने समास्त्वा।
माद्यावाचायं सजातो निषीदत् नः प्रेदग्ने□स्य त्वमग्नेत्वलोपः।।”[17]

एवमेव पुनरुक्तालोपविषये प्रातिशाख्ये□पि “तत्र पूर्वं पूर्वं प्रथमम्”। [18] एवं “यथोक्तं पुनरुक्तं त्रिपदप्रभृति” ।[19] इति सूत्रद्वयमुक्तम्।

**विलोमपाठे अकारलोपः-**

तैत्तिरीयसंहितायां एकारे, ओकारे पूर्वे पदादौ विद्यमानः अकार लुप्यत इति सामान्यतया विधिः विद्यते। तदपवादत्वेन अनुवाकसंज्ञादि ग्रहणेन कुत्रचित् वेदभागेषु अलोपः विहितः। तादृशवेदभागेष्वपि पुनः अलोपस्य अपवादत्वेन लक्षणग्रन्थेषु लोपो विहितः। ते च लोपविधयः तैत्तिरीयप्रातिशाख्ये द्वादशाध्याये वर्तन्ते। व्यासशिक्षायां अपि ऐक्यप्रकरणे वर्तते। तादृश लोपस्थानानां सम्यक् परिज्ञानं लक्षणवाक्यानां परिशीलनद्वारैव सम्भवति। विलोमपाठे यत्र अलोपानुवाकेषु अलोपार्थं परिगणितवेदभागेषु विशेषविध्या अकारो लुप्यते तानि लक्ष्याण्यत्र प्रदर्श्यन्ते। तथा च सूत्रम्-

सूत्रम्- असि इति पदे अकारस्य लोपः। असि।[20]
“धातारातिः” इत्यादिषु अनुवाकेषु एकारपूर्वे ओकारपूर्वे वा “असि” इति पदे अकारः “धातारातिः” इति सूत्रेण अलोपं न प्राप्नोति, किन्तु “असि” इति सूत्रेण “असि” इति पदे विद्यमानस्य अकारस्य लोपः विधीयते। अत्र “असि” इति पदस्य विलोमोदाहरणम्-

मन्त्रः- द्यौरसि विश्वेत्वा। [21] उदाहरणम्-असि विश्वे विश्वेऽस्यसि विश्वे।

मन्त्रः- असितवर्णा हरयः। [22] उदाहरणम्-असितवर्णा हरयो हरयो असितवर्णा असितवर्णा हरयः।

“असितवर्णा हरयः” इत्यत्र तु असि इति सूत्रेण न लोप प्रसक्तिः। यतः “असि” इति सूत्रे असि इति पदग्रहणम्, “पदग्रहणेषु पदं गम्यते” इति नियमात् “असितवर्णाः” इत्यत्र असि इति पदैकदेशे न लोपकार्यम्।।

**यवनहपरस्य अकारस्य लोपः-**

यकार,वकार,नकार,हकारेषु परेषु अकारः धातारातिः इत्यादिषु अलोपानुवाकेषु लुप्यते तेषु यवनहेषु अच् परेषु सत्सु । सूत्रम्- यवनहस्वपरेषु इति।

यपर अकारस्योदाहरणम् - अया ते अग्ने।[23] अया ते तेऽयाऽया ते। इति

वपर अकारस्योदाहरणम्- अवते हेडो वरुण।[24] अवते तेऽवाव ते। इति

नपर अकारस्योदारणम्- अनवस्ते रथमश्वाय।[25] अनवस्ते तेऽनवोऽनवस्ते। इति

हपर अकारस्योदाहरणम्- अहये हन्तवा उ।[26] अवर्धयन्नहयेऽहयेऽवर्धन्नवर्धयन्नहये। अहये हन्तवै हन्तवा अहयेऽहये हन्तवे। इति

**ज,ग्र परस्य अकारलोपः-**

जकारपरः, ग्नपरश्च उदात्त अकारः धातारराति इत्यादिष्वलोपानुवाकेषु लुप्यते। तथा च सूत्रम्- जकारग्नपर उदात्तः।[27] एवं च व्यासशिक्षायाम् - "यवनेहेऽष्वजूर्ध्वेषु ग्नजोऽर्ध्वौकार उच्यकः"[28] इति।

**जकारपर उदात्त अकारलोपः-**

मन्त्रः- हव्यऽजस्रो वक्षि।[29] उदाहरणम्- अजस्रो वक्षि वक्ष्यजहस्रो वक्षि। इति

**ग्न पर उदात्त अकारलोपः-**

मन्त्रः-अग्ने त्वं पारय। [30] उदाहरणम्- अग्ने त्वं त्वमग्नेऽग्ने त्वम्। इति

ग्नपरः अकारः मो, वचः दधानः, स्थे पूर्वश्चेत् अनुदात्तोऽपि लुप्यते। तथा च प्रातिशाख्ये- सूत्रम्- मो वचो दधानस्थे पूर्वश्च[31] इति। एवं च शिक्षायाम्- "मो वचस्थे दधानोऽधो अग्नेत्यकार ऐक्यतः"[32] इति।

**मो इत्यस्य उदाहरणम्-**

मन्त्रः-अग्निः प्रथमो वसुभिः।।[33] उदाहरणम्- अग्निः प्रथमः प्रथमो□ग्निरग्निः प्रथमः इति।

**स्थे इत्यस्य उदाहरणम्-**

मन्त्रः-स्वे अग्ने सधस्थे।[34] उदाहरणम्-अग्ने सधस्थे सधस्थेऽग्ने अग्ने सधस्थे।

**अकारलोपार्थं कार्यभाग्ग्रहणनिरूपणम्-**

अभ्यावर्तिन् इत्यादि ग्रहणेषु पदेषु विद्यमानः अकारः एकारौकारपूर्वे लुप्यते। तथा च प्रातिशाख्यवचनम्- "अभ्यवर्तिन्नपूपमपिदधाम्यद्यान्वदितिश्शर्माग्नेर्जिह्वामग्नयः पप्रयोऽस्माकमस्मेधत्ताश्माऽश्वाश्रुतिरश्यामामाऽर्यमन्नस्मत्पाशानस्मिन् यज्ञेऽस्ताऽव्यथ-मानाऽभिद्रोहमधाय्यदोऽथो अदुग्धा अरिष्टा आरथा अर्चन्त्यन्तरस्यामत्रस्थान्नायाङ्गिर-स्वदकरम्"।।[35] एवमेव व्यासशिक्षायाम्-

"अभ्यावर्तिन्नभिद्रोहमधाय्यपिदधामि च।
अदितिश्शर्माग्रेर्जिह्वामग्नयः पप्रयोऽरथाः"।।[36]

तत्र उदाहरणानि -

मन्त्रः- ते नोऽग्नय पप्रयः।।[37]उदाहरणम्- अस्माकमग्ने अग्नेऽस्माकमस्माकमग्ने। इति

अत्र "अग्नयः" इत्यनन्तरं "पप्रयः" इति पदं भवति चेदेव लोपकार्यं भवति अत एव "पप्रयो अग्नयः" इत्यत्र अलोपः जायते। एवमेव अश्वा श्रुतिः इत्यत्र- मन्त्रः- "अश्वाजनि प्रचेतसः"।।[38] उदाहरणम्- "अश्वाजनि प्रचेतसः प्रचेतसोऽश्वाजन्यश्वाजनि प्रचेतसः"। "अश्वाजनि प्रचेतसः" इत्यत्र विलोमे "प्रचेतसोऽश्वाजनि" इति लोपपाठः "प्रचेतसो अश्वाजनि" इति अलोपपाठः इति पाठद्वयं वर्तते। इदं वाक्यं जीमूतस्येव भवति इत्यनुवाके वर्तते हेतोः अस्य अनुवाकस्य "महापृष्ठ्य"[39] संज्ञकत्वात् अयं अलोपानुवाकः। अतः धातारराति इत्यादिना सूत्रेण अत्र अलोपः प्रसक्तः। किन्तु अत्र "अभ्यवर्तिन्"[40] इति सूत्रे "अश्वाश्रुतिः" इति ग्रहणेन यत्र यत्र "अश्वा" इति दीर्घान्तपदश्रवणं तत्र तत्र लोपः विहितः। एवं स्थिते अश्वाजनि इत्यत्र वेष्टनपदत्वात् विभागे "अश्व" इति अवग्रहस्य ह्रस्वत्वं "देवाशीकासुम्नाश्वर्तावयुनाह्रदया-धोक्थाशुद्धा" [41] इति सूत्रेण विहितम्। तर्हि उत्तरपदसंहितानन्तरं "अश्वा" इति दीर्घं पुरस्कृत्य लोप वक्तव्यो वा, विभागे दीर्घाभावात् ह्रस्वं पुरस्कृत्य अलोपः वक्तव्यो वा इति विचारे क्रियमाणे पाठद्वयमपि शिष्टैरादृतम्। अत्र अलोपपाठस्य साधुत्वकथने इदं समाधानम्।

अश्वा श्रुतिः हत्यत्र च दीर्घः उक्तः सः अत्र अश्व इति

पूर्वखण्डस्य अवग्रहदशायां न भवति। अत एव शिक्षाकाराश्च वदन्ति-

"अश्वाश्रुतिश्च यः प्रोक्तः पदे खण्डे च तं विदुः।
समासे नैव विज्ञेयं दृष्टोऽश्वाजनि कथ्यते"।[42] इति

तथा च अश्वाजनि प्रचेतसः प्रचेतसो अश्वाजन्यश्वाजनि प्रचेतसः इति । लोपपाठस्य साधुत्वकथने समाधानमिदम्। अवग्रहस्य उत्तरपदसंहितैव आदौ विधेया इति नियमानुसारं पूर्वम् अवग्रहस्य उत्तरखण्डेन सह संहितायां क्रियमाणायामेव विलोमपाठार्थं स्वीकर्तुं पदं योग्यं भवति। ततः परं जटादिविकृतिपाठार्थं पदद्वये स्वीकृते सति उत्तरपदसंयोगानन्तरं दीर्घस्यैव श्रवणात् अश्वाश्रुतिः इति ग्रहणबलात् लोप एव वक्तव्य इति। तथा च अश्वाजनि प्रचेतसः प्रचेतसो□श्वाजन्यश्वाजनि प्रचेतसः इति ।
उक्तं च जटामणौ-

"तथैवाश्वाजनीत्यत्राप्येकादेशे कृतेः ततः।
आकरश्रुतिसम्प्राप्तिस्तस्माल्लोपो विलोमके"।।[43]
इति
एवञ्च अश्वाजनि प्रचेतस इत्यत्र विलोमे पाठद्वयं लोपालोपरूपात्मकम् अध्ययनपरम्परायां प्रवर्तते।।

**निष्कर्षः-**
एवं प्रकारेण तैत्तिरीयप्रातिशाख्यग्रन्थस्य परिचयः, तत्र प्रतिपाद्यविषयाः, तस्य सूत्रानुसारेण कथं विकृतिपाठेषु लोपालोपाः भवन्ति तेषां सोदाहरणपुरस्सरं विवेचनद्वारा मन्त्राणां वैशिष्ट्यं लोकातीतमीति ग्रहीतुं शक्यते।

**References**

1. तैत्तिरीय संहिता - सम्पादकः श्रीपाद दामोदर सातवलेकर, स्वाध्यायमण्डलम्, पारडी, गुजरात, वर्ष-1999
2. तैत्तिरीयप्रातिशाख्यम्-संपा- डा. जमुनाप्रसाद पाठकः, चौखम्बा संस्कृतसीरीज, वाराणसी,2007
3. याज्ञवल्क्यशिक्षा- सम्पादकः-अमरनाथ शास्त्री, ज्योतिषप्रकाशनप्रेस,वाराणसी, 1962
4. व्यासशिक्षा - सम्पादकः, आचार्य श्री पट्टाभिराम शास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी, 2004
5. जटादर्पणम्- सम्पादकः, डा विष्णुभट्ल सुब्रह्मण्य घनपाठी, अवधूतदत्तपीठम्, मैसूर, 1998
6. लक्षणत्रयम्- सम्पादकः, गोमठं श्रीनिवासज्योतिषकः, गोमठं पब्लिकेषन्स,712, त्यागराज रोड, मैसूर, वर्ष-2003
7. कौण्डिन्यशिक्षा - Abhyankar KV, Devasthali GV. Vedavik®tilakΣa^asaμgraha: A collection of twelve tracts on Veda vikrtis and allied topics, Poona: Bhandarkar Oriental Research Institute, 1978.
8. जटासिद्धान्तचन्द्रिका - सम्पादकः, चेल्लं श्रीनिवाससोमयाजी, तिरुपतिः, वर्ष- 2015


**पादटिप्पणीः-**
1. तै.प्रा.4.11
2. व्या.शि.28,29
3. व्या.शि.15.1
4. तै.प्रा.11.1
5. व्या.शि.14.1
6. तै.प्रा.11.2
7. तै.सं.11.4
8. तै.सं.1.6.12
9. तै.प्रा.11.4
10. व्या.शि.3.7
11. ज.म.70
12. तै.सं.4.1.3
13. तै.सं.5.1.5
14. व्या.शि.3.15
15. तै.सं.4.1.8
16. कौ.शि.60
17. कौ.शि.64
18. तै.प्रा.5.3
19. तै.प्रा,1,61
20. तै.प्रा,12,2
21. तै.सं.4.15
22. तै.सं 3.1.11,

23. तै.सं.1.2.24
24. तै.सं.1.5.11
25. तै.सं.1.6.12
26. तै.सं.1.6.12
27. तै.प्रा.12.5
28. व्या.शि.15.3
29. तै.सं.4.1.5
30. तै.प्रा.1.1.14
31. तै.प्रा.12.6
32. व्या.शि.15.4
33. तै.सं.2.1.11
34. तै.सं 1.4.44
35. तै.प्रा.12.7
36. व्या.शि.15.5
37. तै.सं.1.7.7
38. तै.सं.4.6.6
39. स.ल.म.10
40. तै.सं.12.7
41. तै.प्रा.3.2
42. ज.सि.च.46
43. ज.म.18